## अष्टमः पाठः

# हितं मनोहारि च दुर्लभं वचः



## माता भूमिः पुत्रोऽहं पृथिव्याः ॥१॥

**पदच्छेदः** – माता भूमिः पुत्रः अहम् पृथिव्याः।

**अन्वयः** – भूमिः माता (अस्ति) अहं पृथिव्याः पुत्रः (अस्मि)।

**भावार्थः** – पृथ्वी अस्मान् माता इव लालयति पालयति च। अतः भूमिः अस्माकं सर्वेषां माता अस्ति। वयं सर्वे अस्याः पृथिव्याः सन्तानाः स्मः। एषा सर्वदा पूज्या अस्ति।



## न रत्नमन्विष्यति, मृग्यते हि तत् ॥२॥

**पदच्छेदः** – न रत्नम् अन्विष्यति मृग्यते हि तत्।

**अन्वयः** – रत्नं न अन्विष्यति, तत् मृग्यते हि।

**भावार्थः** – हीरकादीनि रत्नानि ग्राहकस्य अन्वेषणं न कुर्वन्ति अपितु ग्राहकाः एव रत्नानाम् अन्वेषणं कुर्वन्ति। तथैव अस्मासु यदि गुणाः सन्ति तर्हि गुणज्ञाः स्वयमेव अस्मान् अन्विष्य आगच्छन्ति।



Reprint 2026-27


## शरीरमाद्यं खलु धर्मसाधनम् ॥३॥



**पदच्छेदः** – शरीरम् आद्यम् खलु धर्मसाधनम्।

**अन्वयः** – शरीरं खलु आद्यं धर्मसाधनम्।

**भावार्थः** – यदि अस्माकं शरीरं स्वस्थम् अस्ति तर्हि वयं स्वकर्तव्यस्य पालनं कर्तुं शक्नुमः, अतः अस्माभिः स्वशरीरस्य रक्षा सर्वथा करणीया यतः शरीरम् एव धर्मपालनस्य प्रथमं साधनम् अस्ति।



## क्षणशः कणशश्चैव विद्यामर्थं च साधयेत् ॥४॥

**पदच्छेदः** – क्षणशः कणशः च एव विद्याम् अर्थम् च साधयेत्।

**अन्वयः** – क्षणशः (एव) विद्यां कणशः एव अर्थं च साधयेत्।

**भावार्थः** – ज्ञानं प्राप्तुं समयस्य निरन्तरम् उपयोगः करणीयः। एकस्य अपि क्षणस्य नाशः न करणीयः। एवम् एव यदि कोऽपि धनस्य सङ्ग्रहं कर्तुम् इच्छति तर्हि सः निरन्तरं रूप्यकस्य सङ्ग्रहणं कुर्यात्। '**क्षणत्यागे कुतो विद्या, कणत्यागे कुतो धनम्।**'







Reprint 2026-27

**सुखार्थिनः कुतो विद्या, कुतो विद्यार्थिनः सुखम्॥५॥**

**पदच्छेदः** – सुखार्थिनः कुतः विद्या कुतः विद्यार्थिनः सुखम्।

**अन्वयः** – सुखार्थिनः विद्या कुतः (भवेत्), विद्यार्थिनः सुखं कुतः (भवेत्)।

**भावार्थः** – यः सदैव सुखम् इच्छति, परिश्रमं न करोति, अलसः अस्ति, सः कथं विद्यां प्राप्तुं शक्नोति? अतः यः ज्ञानं लब्धुम् इच्छति सः आलस्यं सुखं च त्यक्त्वा निरन्तरं विद्यार्जनं कुर्यात्।





**गुणाः पूजास्थानं गुणिषु न च लिङ्गं न च वयः॥६॥**

**पदच्छेदः** – गुणाः पूजास्थानं गुणिषु न च लिङ्गम् न च वयः।

**अन्वयः** – गुणिषु गुणाः (एव) पूजास्थानं (भवन्ति) लिङ्गं च न (भवति) वयः च न (भवति)।

**भावार्थः** – गुणानां सर्वदा एव आदरः भवति। गुणवान् जनः पुरुषः स्त्री वा भवेत्, बालः वृद्धः वा भवेत्, सः सर्वदा पूजनीयः एव भवति। आदरस्य कृते लिङ्गम् आयुः वा महत्त्वपूर्णं न भवति।






Reprint 2026-27

**मा ब्रूहि दीनं वचः ।।७।।**

**पदच्छेदः** – मा ब्रूहि दीनम् वचः।

**अन्वयः** – (त्वं) दीनं वचः मा ब्रूहि।

**भावार्थः** – समाजे सर्वविधाः जनाः भवन्ति। केचित् साहाय्यं कुर्वन्ति। केचित् केवलं विकत्थनं कुर्वन्ति, अतः स्वाभिमानी जनः यस्य कस्यापि पुरतः साहाय्यस्य याचनां न कुर्यात्।





**यस्तु क्रियावान् पुरुषः स विद्वान् ।।८।।**

**पदच्छेदः** – यः तु क्रियावान् पुरुषः सः विद्वान्।

**अन्वयः** – यः तु क्रियावान् पुरुषः सः विद्वान् (भवति)।

**भावार्थः** – अर्जितस्य ज्ञानस्य जीवने आचरणेन, व्यवहारे च प्रयोगेण हि मनुष्यः वास्तविकः विद्वान् भवति न तु केवलम् अध्ययनेन। विद्या अनुकूल-कर्मणा विना व्यर्था भवति। 'ज्ञानं भारः क्रियां विना'।



© NCERT not to be republished



Reprint 2026-27

## शीलं परं भूषणम् ।।९।।

**पदच्छेदः** – शीलम् परम् भूषणम्।

**अन्वयः** – शीलं परं भूषणम् (अस्ति)।

**भावार्थः** – मनुष्यस्य आचरणम् एव श्रेष्ठम् आभूषणम् अस्ति। सदाचारं विना अन्ये गुणाः निरर्थकाः भवन्ति।



© NCERT not to be republished

## हितं मनोहारि च दुर्लभं वचः ।।१०।।

**पदच्छेदः** – हितम् मनोहारि च दुर्लभम् वचः।

**अन्वयः** – हितं मनोहारि च वचः दुर्लभं (भवति)।

**भावार्थः** – केचन हितकारकं वचनं वदन्ति किन्तु तत् कठोरतया वदन्ति। केचन मनोरञ्जकं वाक्यं वदन्ति किन्तु तत् हितकारकं न भवति। तादृशं वचनं दुर्लभं भवति यत् हितकारकम् अपि स्यात्, मनोरमम् अपि स्यात्।



Reprint 2026-27

## वयं शब्दार्थान् जानीमः

| शब्दः | अर्थः | हिन्दी | English | मातृभाषया अर्थं लिखन्तु |
|---|---|---|---|---|
| चर | आचरणं कुरु | आचरण करो | (May you) follow | |
| इत्युक्ते | इति कथने | अर्थात् | It means | |
| कुतूहलम् | कौतुकम् | उत्सुकता | Curiosity | |
| भाण्डागारः | कोषः | भण्डार | Treasure-trove | |
| अन्विष्यति | अन्वेषणं करोति | ढूँढ़ता है | Searches | |
| मृग्यते | अन्विष्यते | ढूँढ़ा जाता है | Searches | |
| आद्यम् | प्रथमम् | पहला | First | |
| धर्मसाधनम् | येन धर्मसिद्धिः भवति | धर्म सिद्धि का साधन | Instrument for performing Dharma | |
| क्षणशः | क्षणे क्षणे | प्रत्येक पल में | Every moment | |
| कणशः | कणे कणे | प्रत्येक कण में | In every object and particle | |
| अर्थम् | वित्तम् | धन को | Wealth | |
| साधयेत् | सम्पादयेत् | अर्जन करना चाहिए | Should accomplish | |
| पणस्य | नाणकस्य | रूपये का | Of rupee | |
| सुखार्थिनः | सुखम् इच्छतः | सुख चाहने वाले का | Of the seekers of enjoyment | |
| पूजास्थानम् | श्रद्धायोग्यम् | वन्दनीय | Worthy of worship | |
| वयः | अवस्था | आयु | Age | |
| मा | न | मत | Do not | |
| ब्रूहि | वद | बोलो | May you tell | |
| दीनम् | दैन्यम् | दयनीय | Helpless | |
| विकत्थनम् | गर्ववाणी | मिथ्या आत्म-प्रशंसा | Boasting | |
| क्रियावान् | क्रियाशीलः | सक्रिय | Action-oriented | |
| शीलम् | आचरणम् | चरित्र | Character | |

© NCERT not to be republished



Reprint 2026-27



## वयम् अभ्यासं कुर्मः

**१. अधोलिखितानि वाक्यानि पठित्वा 'आम्' अथवा 'न' इति वदन्तु लिखन्तु च —**

(क) किं वयं पृथिव्याः पुत्राः पुत्र्यः च स्मः ? ..........................

(ख) किं रत्नम् अन्विष्यति ? ..........................

(ग) किं शीलं श्रेष्ठम् आभूषणम् अस्ति ? ..........................

(घ) किं शरीरम् आद्यं धर्मसाधनम् ? ..........................

(ङ) किं गुणानां सर्वदा एव आदरः भवति ? ..........................

(च) किं क्रियाशीलः एव विद्वान् भवति ? ..........................

(छ) किम् अस्माभिः केवलं मनोरञ्जकानि वाक्यानि वक्तव्यानि ? ..........................

(ज) यः सदा सुखम् इच्छति, किं सः विद्यां प्राप्नोति ? ..........................

**२. पाठस्य आधारेण अधोलिखितानां प्रश्नानाम् उत्तराणि एकपदेन लिखन्तु —**

(क) आद्यं धर्मसाधनं किम् ? ..........................

(ख) कीदृशं वचः मा ब्रूहि ? ..........................

(ग) श्रेष्ठम् आभूषणं किम् अस्ति ? ..........................

(घ) सर्वेषां मनुष्याणां माता का अस्ति ? ..........................

(ङ) रत्नानाम् अन्वेषणं के कुर्वन्ति ? ..........................

**३. पाठस्य आधारेण अधोलिखितानां प्रश्नानाम् उत्तराणि पूर्णवाक्येन लिखन्तु —**

(क) कः विद्वान् अस्ति ? ....................................................

(ख) गुणिषु पूजास्थानं किम् ? ....................................................

(ग) कः विद्यां न प्राप्नोति ? ....................................................

© NCERT not to be republished



Reprint 2026-27

(घ) मनुष्यः विद्याम् अर्थं च कथं साधयेत्? ..............................................

(ङ) कीदृशं वचनं दुर्लभम्? ..............................................

**४. रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुर्वन्तु—**

(क) शीलं परं भूषणम्। ..............................................

(ख) मनुष्यः पृथिव्याः सन्तानः अस्ति। ..............................................

(ग) गुणिषु लिङ्गं वयः च न महत्त्वपूर्णम्। ..............................................

(घ) हितकारकं मनोहारि च वचः दुर्लभं भवति। ..............................................

**५. पाठस्य आधारेण उदाहरणानुसारं समुचितं मेलनं कुर्वन्तु—**

| | | |
|---|---|---|
| (क) | क्षणशः कणशः साधयेत् | शरीरम् |
| (ख) | सर्वश्रेष्ठम् आभूषणम् | गुणाः |
| (ग) | रत्नं न अन्विष्यति, तत् | दुर्लभम् |
| (घ) | आद्यं धर्मसाधनम् | शीलम् |
| (ङ) | हितकारकं मनोहारि च वचः | विद्याम् अर्थं च |
| (च) | पूजास्थानम् | मृग्यते |

**६. पाठात् अधोलिखितानां पदानां समानार्थकपदानि चित्वा लिखन्तु—**

(क) सुतः ..........पुत्रः..........

(ख) प्रथमम् ..............................

(ग) धनम् ..............................

(घ) अवस्था ..............................

(ङ) वचनम् ..............................

(च) आचरणम् ..............................

© NCERT not to be republished



Reprint 2026-27

**७. उदाहरणानुसारम् अधोलिखितेषु वाक्येषु रेखाङ्कितपदानां विभक्तिं निर्दिशन्तु —**

(क) माता भूमिः पुत्रोऽहं पृथिव्याः। ............षष्ठी विभक्तिः............
(ख) गुणाः पूजास्थानं गुणिषु न च लिङ्गं न च वयः। ..............................
(ग) शीलं परं भूषणम्। ..............................
(घ) क्षणशः कणशश्चैव विद्याम् अर्थं च साधयेत्। ..............................
(ङ) सुखार्थिनः कुतो विद्या कुतो विद्यार्थिनः सुखम्। ..............................
(च) हितं मनोहारि च दुर्लभं वचः। ..............................

**८. यत्र अग्रे स्वरः अस्ति तत्र अनुस्वारस्य स्थाने 'म्' लिखित्वा वाक्यानि पुनः लिखन्तु —**

(क) न रत्नं अन्विष्यति। ..........न रत्नम् अन्विष्यति।..........
(ख) शरीरं आद्यं खलु धर्मसाधनम्। ..............................
(ग) वयं अद्यतनं पाठं पठामः। ..............................
(घ) त्वं अस्माकं गृहं आगच्छ। ..............................
(ङ) अहं एकं प्रश्नं प्रष्टुं इच्छामि। ..............................
(च) गुणं अर्जयितुं अधिकं प्रयत्नं करोतु। ..............................



## योग्यताविस्तरः

**१. मकारलेखनम्** – यदा 'म'कारात् (म्) परं व्यञ्जनवर्णः भवति, तदा 'म'कारस्य (म्) स्थाने अनुस्वारः ( ं ) लेखनीयः। यदा 'म'कारात् (म्) परं स्वरवर्णः भवति, तदा 'म'कारः (म्) एव लेखनीयः।

यथा – **पुस्तकम् पठति = पुस्तकं पठति।**
**पुस्तकम् अपठत् = पुस्तकम् अपठत्।**

**२. सूक्तिः** – सु + उक्तिः। शोभना + उक्तिः = सूक्तिः इति कथ्यते। एतासु सूक्तिषु जीवनमूल्यानि सन्निहितानि भवन्ति। एताः सूक्तयः अस्मान् जीवने उन्नत्यर्थं प्रेरयन्ति। संस्कृतसाहित्यम् एताभिः सूक्तिभिः परिपूर्णम् अस्ति।

© NCERT not to be republished



Reprint 2026-27

३. अत्र एताः सूक्तयः विविधेभ्यः ग्रन्थेभ्यः संगृहीताः। तेषां ग्रन्थानां संक्षिप्तः परिचयः अत्र दीयते –

- **अथर्ववेदः** – अथर्ववेदः चतुर्षु वेदेषु अन्यतमः अस्ति। अस्मिन् विविधाः स्तुतयः, अर्थशास्त्रं, चिकित्साशास्त्रं, तन्त्रविद्या, विज्ञानं, दर्शनं च वर्णितमस्ति।
- **कुमारसम्भवम्** – महाकविः कालिदासः अस्य ग्रन्थस्य रचयिता। कुमारसम्भवे शिवपार्वत्योः विवाहस्य, कुमारस्य कार्तिकेयस्य च जन्मनः कथा वर्णिता अस्ति।
- **पञ्चतन्त्रम्** – अस्य नीतिग्रन्थस्य लेखकः विष्णुशर्मा अस्ति। अस्मिन् ग्रन्थे पञ्च प्रकरणानि सन्ति। यत्र पशुपक्षिणां कथामाध्यमेन नैतिकशिक्षा प्रदत्ता।
- **उत्तररामचरितम्** – संस्कृतनाटकेषु सुप्रसिद्धस्य अस्य नाटकस्य रचयिता महाकविः भवभूतिः अस्ति। अस्मिन् नाटके भगवतः श्रीरामस्य राज्याभिषेकोत्तरस्य जीवनस्य चरितं वर्णितम् अस्ति।
- **नीतिशतकम्** – उज्जयिन्याः नृपः भर्तृहरिः संस्कृतस्य महान् कविः आसीत्। सः त्रीणि शतककाव्यानि रचितवान्। तेन रचितं नीतिशतकं नीतिशास्त्रस्य प्रसिद्धः ग्रन्थः अस्ति।
- **किरातार्जुनीयम्** – संस्कृतकाव्यपरम्परायां किरातार्जुनीयम् इति विशिष्टं महाकाव्यम् अस्ति। सुप्रसिद्धः महाकविः भारविः अस्य लेखकः अस्ति। अस्मिन् ग्रन्थे किरातवेशधारिणः शिवस्य अर्जुनस्य च कथा वर्णिता अस्ति।



## परियोजनाकार्यम्

**१. अन्तर्जालस्य (Internet) साहाय्येन एतादृशीनां प्रेरणादायिकानां दशानां सूक्तीनां सङ्ग्रहणं कृत्वा भित्तिपत्रम् एकं रचयन्तु।**

**२. स्वमातृभाषायां प्रसिद्धाः कतिचन सूक्तीः लिखन्तु।**

**३. एताः सूक्तीः पठित्वा भवतां मनसि कः विचारः उत्पद्यते इति स्वभाषया लिखन्तु।**



## कार्यकलापः

**एताः सूक्तीः कण्ठस्थीकृत्य कक्षायां श्रावयन्तु।**

© NCERT not to be republished



Reprint 2026-27